**Kaumodaki : Journal of Multidisciplinary Studies**
[A Peer-Reviewed, Open Access Journal; Indexed in NepJoL]
ISSN : 2822 - 1567 (Print); ISSN : 2822 -1583 (Online)
Published by Research Management Cell, Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

# शाब्दिकालङ्कारिकयोर्मते व्यञ्जनावृत्तिविचारः

**भोलानारायण रेग्मी**
Department of Navyavyakaran (Sanskrit Grammar), Shree Vinduwasini Sanskrit Vidyapeeth (Campus), Pokhara, Nepal

***Article History**: Submitted 05 Oct. 2024; Reviewed 30 Oct. 2024; Accepted 07 Nov. 2024*
***Corresponding Author**: Bholanarayan Regmi, **Email**: drbholanarayanregmi@gmail.com*
***DOI :** https://doi.org/10.3126/kdk.v5i1.73640*
*Copyright 2025 © the Author(s) and the Publisher*

**लेखसारः**

*हितानुशासनरूपस्य शास्त्रस्य पदपदार्थरूपत्वं सर्वसिद्धं वर्तते । एवं सति पदे पदार्थे च सम्बन्धरूपेण व्यञ्जनाया अपरिहार्यत्वात् शाब्दिकानां मते वर्णपदवाक्यजातिव्यक्तिभेदेन अष्टौ स्फोटाः सन्ति । तेषु अखण्डवाक्यस्फोटस्यैव मुख्यतं शब्दब्रह्मण स्वरूपं च स्वीकर्तं विद्यते । स च स्फोटः स्फुटत्यर्थो यस्मादशौ स्फोटः । स्फुट्यत अर्थ अनेन इति स्फोटः वा । शब्दार्थोभयात्मकः स्फोटः सिद्धः । तच्च प्राकृतध्वनिव्यङ्ग्यत्वे सति निराकाङ्क्षार्थ बोधजनकत्वं स्फोटत्वम् । एतादृशं लक्षणं स्फोटस्य ध्वनि व्यङ्ग्यत्वं व्यञ्जनां विना न सम्भवति । यतः शाब्दिकानां मते व्यञ्जनावृतिरावश्यकी एवञ्च आलङ्कारिकाणां साहित्यशास्त्रे काव्यत्वं रसास्वादेन ब्रह्मसहोदरत्वं व्यङ्ग्यत्वं च न सम्भवति । हितेन सह सहितं, तस्य भावः कर्म वा साहित्यम् । व्यञ्जनाविरहेण लोकोपकारकत्वमपि न सम्भवेत । अतः तस्या वृतेहेः परिशीलनं विद्येते । सा च परार्थाऽभिधानां लक्ष्यते परशब्देन परत्वमर्थशब्देन च आत्मीयत्वं बोद्धयम् । एवञ्च परार्थबोधकत्वे सति स्वार्थबोधकत्वं वृत्तित्वमिति फलति । अपि च शाब्दबोधजनकज्ञानविषयपदपदार्थसम्बन्धत्वं वृत्तित्वमिति वैयाकरणनये शब्दशक्तिरूपा वृत्तिस्त्रिधा भवति यथा- अभिधालक्षणाव्यञ्जनेति नागेशैर्मञ्जूषायामुक्तम् परं परार्थाऽभिधानत्वेन कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयो भट्टोजिदीक्षितेन समासादौ उक्ताः, तासु व्यञ्जनाविषये विवदमानानां दार्शनिकान्तराणाम्मतमतिक्रम्य वैयाकरणानां मते व्यञ्जना नाम मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कार विशेषेति परमलघुमञ्जूषायां विवृतम् । प्रतिभा च नवनवोन्मेषशालिनीबुद्धिः । वक्त्रादिवैशिष्ट्यसहकारेण जन्मान्तरीयतद्धीजनकत्वप्रकारकज्ञानजन्यसंस्कारोद्बोधजबुद्धिरूपा, वासनाविशेषरूपेति वा । तथा च शक्तिरेतज्जन्मानुभूतैव बोधजनिका व्यञ्जना तु जन्मान्तरं गृहीता अपि बोध्या विशेषोऽत्र वर्तते । आलङ्कारिकास्तु शक्तिस्त्रिधा अभिधालक्षणाव्यञ्जनेति वदन्ति सा च व्यञ्जनाऽभिधेयः शक्यलक्ष्यतात्पर्यार्थातिरिक्तो व्यङ्ग्यत्वेन प्रतिपाद्यो वस्त्वलङ्काररसास्वादनैकलक्षणे बोध्यः = प्रत्याय्यः । स एव शब्दस्य अर्थस्यान्तरिकी वृत्तिर्व्यञ्जना*

*उच्यते । वैयाकरणास्तु वृत्तिस्त्रिधा शक्ति-लक्षणा- व्यञ्जनेति वदन्ति । इत्थमत्र कथने विभेदेऽपि उभयोर्मते त्रिधैवशब्दशक्तिरित्यत्र विवादो नास्ति, वैयाकरणैरङ्गीकृतया व्यञ्जनया निपातानां द्योतकत्वं स्फोटस्याऽभिव्यङ्ग्यत्वञ्चानयैव शब्दशक्त्या सिद्धा । आलङ्कारिकाणां नये तु व्यञ्जनां विना व्यङ्ग्यकाव्यत्वादीनां काव्ये सर्वजनाऽभिरुचिकरत्वं ब्रह्मसहोदररसस्वरूपत्वञ्च न सम्भवति, तच्च अनयैव शक्त्या प्रतिपादिता अभिहिता वा नान्योपायैः सम्भवति । अत आलङ्कारिकवैयाकरणयोर्मतं एतद्विषये किम् ? कथञ्च व्यञ्जनाया विभेदव्यङ्ग्यत्वं प्रत्यपादि ? स एव विषयोऽत्र प्रतिपाद्यते।*
**शब्दकुञ्जी** : प्रतिभा, वृत्तिः, व्यञ्जना, शक्तिः, संस्कारविशेषः

## विषयपरिचयः

जगत्यामस्यां देहधारिणां प्राणिनां हितानुशासने प्रवर्तमानानां पौरस्त्यपाश्चात्यशास्त्राणां निःश्रेयसभ्युदयसाधनमेव परमं लक्ष्यं वर्तते । तत्रापि सर्वसाधनस्रोतादिसम्पन्नस्यातिचेतनशीलस्य मानवमात्रस्याभ्युदयः प्राथम्येन दृष्टफलभूतं पौरस्त्यशास्त्रं चेद् द्वितीयञ्चादृष्टरूपं मोक्षफलकं विद्यते । सम्भवति दृष्टफलकत्वे सति अदृष्टफलकल्पनस्य अन्याय्यत्वरूपन्यायस्य जागरुकत्वात् । आराधनानां सर्वेषां शक्तेराराधनं परम् । तस्मात्परतरं मन्ये व्यङ्ग्या दृष्ट्याऽर्थसिद्धये । अतः शक्तिविषये द्वैविध्यं त्रैविध्यञ्चाधिकमतेन व्यञ्जना शक्तिः सर्वाऽभिव्यङ्ग्यार्थमावश्यकी वर्तते। तस्याः स्वरूपं शाब्दिकमतेन आलङ्कारिकमतेन च मुख्यार्थसंबद्धासंबद्धसाधरणत्वे सति मुख्यार्थबाधग्रहाद्यप्रयोज्यत्वेन प्रसिद्धार्थाविषयकधीजनकत्वं व्यञ्जनात्वं निष्कृष्टलक्ष्यणेन वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषरूपाया अभिधालक्षणातात्पर्यैबोधार्थातिरिक्तया वृत्त्या रसालङ्काराऽभिव्यञ्जितस्यार्थव्यङ्ग्यस्यावश्यमेव विमर्शः कर्तव्य इति धिया अस्मिन् लघुशोधात्मके लेखे उक्ताया वृत्तेर्विचारणाः प्रस्तूयन्ते ।

## समस्याकथनम्:

यद्यपि शाब्दिकमते आलङ्कारिकमतेन च व्यञ्जनावृत्तिविषयकं चिन्तनं बहुधा बहुभिर्विद्वद्भिः कृतं लभ्यते तथापि व्यञ्जनायाः स्वरूपं पृथक् पृथक् करणेऽपि शाब्दिकालङ्कारिकयोमतेनैतियरूपेणाचार्याणां मतभेदविषयको विचारो वस्तुगत्या तत्तदाचार्याणां तात्पर्यञ्च परिशीलितं न कुत्रचिल्लभ्यते । अतोऽत्रविषये प्रस्तुताः समस्या मूलभूता दृश्यन्ते :–

क) वृत्तिः का ?

ख) व्यञ्जनावृत्तेः स्वरूपं किम् ?

ग) शाब्दिकालङ्कारियोर्व्यञ्जना का ?

घ) उभयोः पारस्परिको भेदः कः ?

## उद्देश्यकथनम्:

शाब्दिकालङ्कारिकयोर्व्यञ्जनामादाय स्वरूपप्रतिपादनपुरस्सरमावश्यकतायाः समीक्षणं विधाय तत्तात्पर्यप्रकाशनेन निष्कर्षणमेव प्रस्तुतस्य शोधलेखस्य मुख्यं समुद्देश्यं वर्तते। तथा चेमानि उद्देश्यानि मुख्यरूपेण गृहीतानि सन्ति। तद्यथा–

क) वृत्तेर्लक्षणोपपादनम् ।

ख) मतद्वयेन वृत्तेः स्वरूपोपादनम् ।

ग) उभयोर्मते वैशिष्ट्यप्रतिपादनम् ।

घ) वैयाकरणा आलङ्कारिकाश्च व्यञ्जनाविषये साम्येन वैषम्येन वा परिचर्चयन्ति तन्निदर्शनेन परिशीलनम् ।

## पूर्वकार्यस्य समीक्षणम्

पौरस्त्यवाङ्मये व्याकरणशब्दस्य साहित्यशास्त्रस्य च विशिष्टं स्थानं विद्यते प्रायः सर्वस्यापि पौरस्त्य वाङ्मयस्य वृत्तिविषये गभीरं चिन्तनं दृश्यते। सा च वृत्तिः शक्तिरूपा, लक्षणारूपा, व्यञ्जनारूपा च विद्यते। प्रथमं शक्तिस्वीकारेऽपि लक्षणाया व्यञ्जनायाश्च आवश्यकता सर्वविधरूपेण दृश्यते । अतोऽत्रविषये तार्किकैः मीमांसकैश्चाङ्गीकारेऽपि गभीरा विचाराः शाब्दिकैः परमलघुमञ्जूषायां वैयाकरणसिद्धान्तमञ्जूषायां वैयाकरणसिद्धान्तलघुमञ्जूषायाञ्च आलङ्कारिकैः प्रकरणग्रन्थे साहित्यदर्पणे काव्यप्रकाशे रसªËधरे कादम्बर्यादौ च कृताः सन्ति। परन्तु अर्वाचीनाचार्यैर्यत्किञ्चित् विचारणं कृतं नवाधुनिकानुसन्धातृभिर्व्यञ्जनाविषये विकीर्णतया लिखितेऽपि व्यञ्जनातत्त्वमादाय शाब्दिकालङ्कारियोर्मतभेदमादाय समग्रतया चैकीकृत्य तत्तन्मतानाम्मूलमन्विष्य न च चिन्तनं विहितं यथाऽपेक्षते ।

अत्रानुसन्धाने व्यञ्जनावृत्तेः स्वरूपं तस्याऽवश्यकताञ्च संसाध्य थालीपुलाकन्यायेन समयानुकूलेन च प्रस्तूतं विद्यते ।

## अध्ययनस्यौचित्यम्

प्रस्तुतेलेखे शाब्दिकानां साहित्यिकानंञ्च मतेन व्यञ्जनावृत्तिं पुरस्कृत्य स्वरूपलक्षणं तटस्थलक्षञ्च विचार्य पारस्परिको विभेदपुरस्सरं व्यञ्जनावृत्तिमादाय अध्ययनाय अध्यापनाय अनुसन्धानाय च प्रस्तुतस्य लघु शोधात्मकस्य अन्येषां विशदवृत्तिविषयाणां साहाय्य यं भजमानत्वादस्य औचित्यं सिद्ध्यति नात्र काञ्चित् विप्रतिपत्तिः ।

## अध्ययनस्य सीमाङ्कनम्

शाब्दिकालङ्कारिकयोर्मतसम्बद्धं व्यञ्जनाया वृत्तेर्विमर्शणमेव प्रस्तुतस्य शोधस्य क्षेत्रं सीमा च वरीवर्ति ।

## शोधविधिः

प्रस्तुतं लघुशोधं सम्पादयितुं सामग्रीसङ्कलनविधिरध्ययनविश्लेषणविधिश्चेति शोधविधिर्द्विधा । प्रसङ्गेऽस्मिन् आदौ आवश्यकसामग्रीसङ्कलनङ्कथं विहितमिति निर्दिश्यते चेत्तदनु सङ्कलितसामग्रीमादाय कतमञ्च विधिमवलम्ब्याऽऽलेखोऽयं सम्पादित इति स्पष्टीक्रियते। तत्र सम्पादितस्य शोधात्मकस्य लेखस्य कृत आवश्यकसामग्रीणं सङ्कलनार्थं पुस्तकालयाः प्रयुक्ता : । तत्र प्राप्ता ग्रन्था एव प्रमुखसामग्रीत्वेन गृहीता । एवमेव यथावश्यकं शाब्दिकालङ्कारिकैर्विद्वद्भिः सह संवादादिकमपि विधाय सामग्रीसङ्कलनं विहितमस्ति ।

एवमेव प्रस्तुत अनुसन्धाने मूलतः समीक्षणात्मको विधिरवलम्बितो वर्तते । अस्मिंश्च निबन्धे शास्त्रनिर्दिष्टान् सिद्धान्ताँश्च आदाय तेषां विषयाणां विश्लेषणं विधाय प्रायशो निगमनात्मको विधिरवलम्बितो वर्तते ।

### शाब्दिकमतेन व्यञ्जनाविचारः

शाब्दिका व्यञ्जनामप्येकां तृतीयां वृत्तिमभ्युपगच्छन्ति । प्रतिभोद्भूतार्थविषयकः संस्कारविशेषो हि व्यञ्जना कथ्यते । **संस्कारविशेषश्च मुख्यार्थनिरपेक्षबोधजनकोः मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयकं वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धश्च ।** (नागेशभट्टः, १९९७,पृ.६०)

तेन व्यञ्जना न लक्षणया गतार्था। लक्षणा तु मुख्यार्थानुपपत्तावेव प्रवर्तते, यथा 'गङ्गायां घोषः' इत्यादौ। व्यञ्जना तु तन्निरपेक्षमेव प्रवर्तते, यथा –

**निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।**
**मिथ्यावादिनि ! दूति ! बान्धवजनस्याज्ञातपीडागमे**

**वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥** (मिश्रः, १९७४, पृ.६२–६३)

इत्यादौ मुख्यार्थबाधाभावेऽप्यधमपदपर्यालोचनया रन्तुमेव गताऽसीति व्यङ्ग्यार्थप्रतीतिः । लक्षणा मुख्यार्थसम्बद्धा एव व्यञ्जना तु क्वचिदसम्बद्धाऽपि यथा **गङ्गायां घोष** इत्यत्र शैत्यपावनत्वादिगङ्गापदस्य प्रवाहरूपमुख्यार्थसम्बद्धः व्यञ्जनाविषयः **'निश्वासान्ध इवादर्शः'** इत्यत्रासम्बद्धः अप्रकाशत्वरूपव्यङ्ग्यर्थस्तद्विषयः । एतेन व्यञ्जना लक्षणभिन्नैव, न तया गतार्थस्तद्विषयो वा । एतेन व्यञ्जना शक्तिर्लक्षणया भिन्नैव, न तया गतार्थेति स्पष्टमेव । न च व्यञ्जना शक्तिः । शक्तिः प्रसिद्धार्थविषया भवति । व्यञ्जना प्रसिद्धाप्रसिद्धार्थविषया यथा **'राजत्युमावल्लभः'** इत्यत्र उमावल्लभत्वं शंकरस्यापि प्रसिद्धमेव यद्धि व्यञ्जनाया विषयः । अप्रसिद्धार्थश्च वक्त्रादिवैशिष्टयज्ञानोत्पन्नः प्रतिभाशालिनामेवावगम्यः यथा **'दक्षिणं नयनं हरेरित्यत्र'** हरेर्दक्षिणनेत्रस्य तुर्यात्मकत्वमर्थः । अभिधा हि सामान्यजनविषयः, व्यञ्जना तु प्रतिभाशालिजनविषय इति ।

अत एवोक्तं श्रीमता नागेशेन –

"मद्रख्यार्थबाधग्रहनिरपेक्षबोधजनको मद्रख्यार्थसम्बद्धासम्बन्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्यद्भद्रद्धः संस्कारविशेषो व्यञ्जना ।" ( भट्ट :, १९९७, पृ.६०- ६१) अतएव निपातानां द्योतकत्वं स्फोटस्य वैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेष इति । व्यङ्ग्यता च हर्यादिभिरुक्ता । द्योतकत्वञ्च **'क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वमिति वैयाकरणानामपि तत्स्वीकार आवश्यकः । एषा च शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र, तथैवानुभवात् । वक्त्रादिवैशिष्ट्यादिज्ञानं व्यङ्ग्यविशेषबोधे सहकारीति न सर्वत्र तदपेक्षेति ।** यथा -

**शाब्दिकैः सा स्मृतैकैव त्रिविधापि स्वरादिवत् ।**
**अभिधालक्षणाव्यक्तिरित्याख्या त्रितयं मतम् ॥**
**विविधा वृत्तिरेकैव वैलक्षण्येऽपि वस्तुतः ।**
**इत्याहुः शाब्दिकास्तेषां भिन्नत्वे गौरवाद्भयम् ।** (भट्टः, १९५८, पृ.३८–३९)

यथैक एव स्वरो ह्रस्वदीर्घप्लुतभेदेन त्रिविधो भवति तथा शक्तिरेव शब्दवृत्तिरभिधालक्षणाव्यञ्जनाभेदेन त्रिविधा भवति । वृत्तीनां भेदे गौरवमस्ति इति तट्टीका ।

अत्र वैयाकरणाः **- शक्तिरेव शब्दवृत्तिः, तस्याश्च प्रसिद्ध्यप्रसिद्धिभ्यां शक्तिलक्षणाव्यपदेशः, व्यञ्जना तु तत्रान्तर्भवति दीर्घव्यापारादिति** । एवञ्च शाब्दिका व्यञ्जनावृत्तिं नाभ्युपगच्छन्तीति वैयाकरणमतमभ्यूह्य, प्रत्याख्याता आशाधरभट्टेन कोविदानन्दे त्रिवेणिकायाञ्च । तस्यायं भावः स्यात् यत् भाष्यादिप्राचीनतमेष्वाकरग्रन्थेषु क्वचिदपि व्यञ्जनाविषयको विशिष्टो विचारो नोपलभ्यते । टीकादिग्रन्थेषु च वृत्तिश्च शक्तिलक्षणाऽन्यतररूपा इत्येव लिखितम्, न तु व्यञ्जनाऽभिप्रायेण अन्यतमरूपा इति । लक्ष्यार्थस्य माणवकादेर्नियतोपस्थितिकत्वाभावेन सिंहादिपदरूपप्रातिपदिकार्थत्वाभावशङ्कां मनसि निधायान्वयानुपपत्तिपूर्विका लक्षणा पदे एव' इत्येव शेखरकारेणोक्तम्, न तु व्यञ्जनास्थलेऽपि शङ्कासमाधाने समुद्भाविते।" व्यञ्जनास्वीकारे तु तत्रापि नियतोपस्थितिकत्वाभावे तयोरुद्भावनमवश्यं कर्तव्यमासीत् ।

यद्यपि स्फोटवादे ये श्रद्दधते, तैरवश्यं व्यञ्जनाङ्गीकर्तव्या । अन्यथा सफलशाब्दिकाभिमता तस्य अत एव निपातानां व्यङ्ग्यता नैवसिद्धा भवेत् । अत एव नागेशभट्टेन व्यञ्जनास्वरूपं प्रदर्श्य उक्तं द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्ता । द्योतकत्वञ्च क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वमिति वैयाकरणैरपि तत्स्वीकार आवश्यक इति । तथापि तार्किकेषु शाश्वतिकविरोधानां शाब्दिकानामन्यथा लक्षणायाः प्रत्याख्याने अन्याय्यः । तथा च 'तार्किकमतप्रत्याख्यानमात्रफलको व्यञ्जनासमर्थनप्रयासो भवेत् । जघन्यवृत्तिकल्पनाया अन्याय्त्वात्, वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात्, **सति तात्पर्ये सर्वे सर्वार्थवाचका** इति भाष्याल्लक्षणाया अभावाच्च

इत्यादयो यावन्तो हेतवो नागेशेन प्रदर्शितास्ते सर्वेऽपि व्यञ्जनां कथं न विरुन्ध्युः ।

व्यञ्जनाया यावानर्थो व्यङ्ग्यो भवति, तावान् सर्वोऽप्यप्रसिद्धशक्त्या व्यक्तो भविष्यति । व्यञ्जनावृत्तौ श्रद्धामावहतामालङ्कारिकाणां मते सहृदयैरेव व्यङ्ग्योऽर्थोऽवगम्यते, तादृशोऽर्थोऽप्रसिद्धशक्त्या वैयाकरणै- र्भोत्स्यते, किं व्यञ्जनया ? तथा चोक्तं नागेशेन शक्तिर्द्विविधा, प्रसिद्धा, अप्रसिद्धा च । तद्यथा –

**आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वम् । सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम् ।** तत्र गङ्गादिपदानां प्रवाहादौ प्रसिद्धा शक्तिः, तीरादौ च अप्रसिद्धेति किमनुपपन्नम् । ननु सर्वे सर्वार्थवाचका इति ब्रूषे चेत् तर्हि घटपदात् पटप्रत्ययः किन्न स्यादिति चेन्न, सति तात्पर्ये इत्युक्तत्वात् तात्पर्याभावादिति गृहाण । तात्पर्यञ्चात्रेश्वरं **देवतामहर्षिलोकवृद्ध-परम्परातोऽस्मदादिभिर्लब्धमिति** सर्वं सुरूढमेवेति बोद्धव्यम् ।

एवञ्च यथा लक्षणास्थले तात्पर्यवशादप्रसिद्धया शक्त्यैवेष्टार्थस्य लाभस्तथा व्यञ्जनास्थलेऽपि वक्त्रादिवैशिष्ट्यसहकारेणाप्रसिद्धशक्त्यैवेष्टार्थलाभो भविष्यति । किं व्यञ्जनया ? यदि हर्यादिभिर्निपातानां द्योतकत्वस्वीकारात्, स्फोटस्य व्यङ्ग्यत्वस्वीकाराच्च शाब्दिकैर्द्योतकतारूपा व्यञ्जना स्वीक्रियते, तर्हि प्रादीनां द्योतकत्वाङ्गीकारा- नैयायिकैरपि सा स्वीकर्तव्या भवेत्, न च तैः स्वीक्रियते । यद्यन्यदेव व्यञ्जकत्वं तेषां तर्हि शाब्दिकानामपि तद् अन्यदेव भवतु, किं लक्षणाभेदेनाधिकतास्वीकारगौरवेण । एवञ्च शाब्दिकानां व्यञ्जनायामनास्था प्रतीयते । परमलघुमञ्जूषा नागेशस्य कृतिर्नास्ति वैयाकरणसिद्धान्तमञ्जूषायां यस्य सिद्धान्तस्य यया परिपाट्या प्रतिपादनाय समादृता सा परिपाटी परमलघुमञ्जूषायां न दृश्यते । पदार्थानां तत्र तत्र विपर्यासोऽपि विलोक्यते । लक्षणाप्रत्याख्याने यावान् सन्नाहः परमलघुमञ्जूषायां निभाल्यते न तावान् तत्र । एवमनेके विचारभेदा अपि दृश्यन्ते द्वयोर्ग्रन्थयोरिति कथं तदाधारेण व्यञ्जना न स्वीक्रियते वैयाकरणैरिति निश्चेतुं शक्यत इत्यपि विदुषां प्रवादोऽस्ति । एवं सत्यपि कोविदानन्दे आशाधर भट्टस्य युक्त्याऽप्युपेक्षितुं प्रेक्षवद्भिर्न पार्यन्ते ।

**आलङ्कारिकमते व्यञ्जनाविचारः**

वृत्तिर्हि केषाञ्चिन्मते द्विधा शक्तिर्लक्षणा चेति । केचित्तृतीयां तात्पर्याख्यां मन्यन्ते । **तात्पर्यार्थोऽपिकेषुचित् इत्युक्तश्च** । आलङ्कारिकास्तु चतुर्थीं व्यञ्जनामपि स्वीर्कुवन्ति । एतेषामयमभिप्रायः, **'गङ्गायां घोषः'** इत्यादौ जलप्रवाहरूपं मुख्यार्थं बोधयित्वाऽभिधा विरता जायते । न पद्रनः संसर्गात्मकतात्पर्यरूपार्थं बोधयितद्रं क्षमा, नापि च तटरूपलक्ष्यार्थप्रतिपादने शक्तेति, शब्दबद्रद्धिकर्मणां विरम्य व्यापाराभावादित्यद्रक्तेः । ततो मद्रख्यार्थबोधने उपक्षीणायामभिधायां संसार्गार्थबोधने विरतायां तात्पर्यायां तटादिकं लक्षीकृत्य श्रान्तायां लक्षणायां च केन केनापि रूपेण शैत्य-पावनत्वादिप्रतीतिः स्यात् ? प्रकृते तद्र तदर्थं व्यञ्जनाव्यापारः, स चावश्यं स्वीकार्यः । अन्यथा स्वायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्यामहे, इति न्यायविरुद्धलाक्षणिकशब्दस्य प्रयोग एव व्यर्थः स्यात् । शैत्यादिप्रतीतेर्लक्ष्यत्वे प्रयोजनान्तरकल्पनानवस्थापातात् । तस्मादत्र शैत्यपावनत्वप्रतीतिर्व्यञ्जनयैव । यदि नाम व्यञ्जनाव्यापारो न स्यात् ? नोपमादिस्थले रूढिमूला लक्षणा, न च शैत्यपावनत्वादिरूपोऽर्थः गङ्गादिपदस्य सङ्केतः, नैव च शैत्यादिरूपोऽर्थो लक्ष्यः मुख्यार्थबाधाभावात् । यथा नाम गङ्गाशब्दस्तटरूपार्थबोधने समर्थः, तथैव शीताद्यर्थबोधने समर्थः न निर्व्यापाराच्छब्दात्कस्याप्यर्थस्य प्रतीतिरिति केषाञ्चिन्मतं सम्मतम् । तस्मात्प्रयोजनप्रत्ययार्थं व्यञ्जनाव्यापारोऽभ्युपेयः । व्यञ्जनायाः स्वरूपमवगमयितद्रं विश्वनाथेन प्रत्यपादि -

**विरतास्वभिधाद्यासु ययार्थो बोध्यते परः ।**
**सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥** (विश्वनाथः, १९८३,पृ. ५५)

अयं भावः- अभिधाद्यासु अभिधालक्षणातात्पर्यात्मिकासु तिसृष्वेव वृत्तिषु विरतासु स्वमर्थं बोधयित्वा निवृत्तव्यापारासु सतीषु, यया वृत्या अपरोऽभिधेयादिव्यतिरिक्तः अर्थो व्यङ्ग्यत्वेन प्रतिपादयिष्यमाणो वस्त्वलङ्काररसलक्षणो बोध्यते प्रत्याय्यते । तस्य शब्दस्य अर्थस्य च वृत्तिः शक्तिः व्यञ्जना नाम उच्यत इति बोध्यः ।

तथा च अभिधेयादिभिन्नार्थोपस्थापकवृत्तित्वं व्यञ्जनात्वमिति लक्षणं पर्यवसितम् । इहादिपदेन लक्ष्यार्थतात्पर्यार्थयोः परिग्रहः । नन्वत्र वाच्यत्वस्य केवलान्वयित्वेनाप्रसिद्धिः स्यादिति चेत् ? मैवम्, तत्तत्पदनिष्ठवाचकतानिरुपित- वाच्यतावच्छिन्नप्रतियोगिताकभेदवत्वमर्थस्य विवक्षितत्वेन दोषाभावात् ।

मञ्जूषाकारनागोजिभट्टास्तु- **मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जनेत्याहुः ।** मुख्यार्थस्य शक्यार्थस्य, बाधः, परम्परासम्बन्धनिरूपकाणां पदार्थानां तात्पर्यविषयीभूतसम्बन्धेनैकपदार्थेऽपरपदार्थाभावः तन्निरपेक्षो यो बोधस्तज्जनकः, अत्र 'संस्कारविशेषः' इत्यत्रान्वयः।मुख्यार्थेन सम्बद्धासम्बद्धौ यौ अर्थौ तदुभयसाधारणौ यौ प्रसिद्धाप्रसिद्धार्थौ तौ विषयौ यस्य सः।वक्त्रादिवैशिष्ट्यवैलक्षण्यम्, अन्यव्यावृत्तो धर्म इत्यर्थः । तस्य यज्ज्ञानं, तच्च प्रतिभा च ते आदिनी यस्य निपुणताघटितसमूहस्य, तेनोदबुद्धो यः संस्कारविशेषः स व्यञ्जना । एवञ्च वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिना अन्यार्थधीस्तद्धेतुव्यापारत्वं व्यञ्जनात्वं फलितम् । प्रतिभा च वक्त्रादिवैशिष्ट्यसहकारेण **जन्मातरीयतद्धीजनकत्वप्रकारकज्ञानजन्यसंस्कारोद्बोधजबुद्धिरूपा,** वासनाविशेष- रूपेति यावत् । सैव 'नवनवोन्मेषशालिनी' इत्युच्यते । एवञ्च शक्तिरेतज्जन्मानुभूतैव बोधजनिका व्यञ्जना तु जन्मान्तरगृहीतापीति निष्कर्षः ।

**व्यञ्जनावृत्तेः स्वरूपम्**

शिष्यानध्याप्य सायंकाले गुरुर्वक्ति – **'अर्कोऽस्तं गतः'** इति । वाक्यनिष्ठशक्तिसम्बन्धेन सूर्यकर्तृकं भूतकालिकमस्तंगमनमिति बोधो भवति । परन्तु तद्बोधने सहृदयानां मनसि न भवति विश्रान्तिः अपि तु अस्माभिः सर्वैरपि सन्ध्योपासनं कर्तव्यमिति अस्य द्वितीयार्थस्य बोधने वै विश्रान्तिर्लभ्यते । स चायं द्वितीयोऽर्थ उक्तवाक्येन सम्बद्ध एव बोध्यते, असम्बद्धो वा ? न तावदन्त्यः पक्षः, असम्बद्धार्थबोधनेऽतिप्रसङ्गो दुर्निवारः स्यात् । कस्याप्यर्थस्य बोधोऽस्तु नाम, को वारयेत् ? नापि प्रथमः, सम्बन्धस्याद्यावध्यज्ञातत्वादिति चेत्, उच्यते– यो हि सम्बन्धो भवद्भिरज्ञातः, स व्यञ्जनाभिधोऽस्तीति ज्ञायताम्।शब्दतदर्थयोरयं सम्बन्धो द्योत्य–द्योतकभावव्यङ्ग्य्व्यञ्जकभावशब्दाभ्यामपि सङ्कीर्तितो भवति । अयं च सम्बन्धो वाच्यवाचक– भावरूपशक्तिसम्बन्धात्, लक्ष्यलक्षणभावरूपलक्षणासम्बन्धाच्च विलक्षण एवास्ति ।

शक्यार्थसम्बद्धः, असम्बद्धो वा नानाविधोऽर्थोऽनेन सम्बन्धेन बोध्यते । व्याकरणदर्शनस्य त्वयं सम्बन्धः प्राणभूत एवास्ते । एनमन्तरा व्याकरणशास्त्रसर्वस्वभूतस्फोटतत्त्वस्य प्रकाशनमेव न भविष्यति । उक्तञ्च–

**शब्दस्य ग्रहणे हेतुःप्राकृतो ध्वनिरिष्यते ।**
**स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपाद्यते ॥**

एवमेव भर्तृहरिणाऽपि –

**प्रत्येकं व्यञ्जका भिन्ना वर्णवाक्यपदेषु ये ।**
**तेषामत्यन्तभेदेऽपि सङ्कीर्णा इव शक्तयः** ॥ (भर्तृहरिः, २०१६ पृ.सं. १४४)

अत्र प्रथमयोक्त्या प्राकृतध्वनेः शब्दस्य (स्फोटस्य) व्यञ्जकत्वम् । वैकृध्वनेः स्फोटस्य स्थितिविशेषहेतुतवं प्रतिपाद्यते । द्वितीययोक्त्या प्रत्येकं वर्णाः पदस्फोटं वाक्यस्फोटं च व्यञ्जयन्ति । अत्र वर्णपदेन प्राकृतध्वनिरेव गृह्यते । अत एवोक्तम् **–"प्राकृतस्य ध्वनेः कालः त्रिमात्रात्मकः स्फोटस्यारोपितः कालो भवति, स्फोटस्तु वस्तुतो**

**दिग्देशकालाद्यनवच्छिन्न एव विभुत्वञ्चापरिमितत्वादनवच्छिन्नत्वाच्च ।**

अनेन ध्वनेर्व्यञ्जकत्वं सुस्पष्टमायाति, अतश्च ध्वनिगता व्यञ्जनावृत्तिः स्वीकार्या । अनया व्यञ्जना स्फोटस्य स्वरूपमभिव्यक्तं भवति । अतः स्फोटरूपव्यङ्ग्येन सह ध्वनिरूपव्यञ्जकस्य व्यञ्जकभावसम्बन्धः सुसम्पन्नो भवति । परन्त्वनया व्यञ्जनया पदार्थबोधो वाक्यार्थबोधो वा न भवति । अर्थस्य बोधस्तु स्फोटेनैव प्रकाशितेन भवतीति जिज्ञासायां तदपि तत्त्वं शाब्दिकैरभ्युपेयत एव– स्फोटोऽप्यर्थस्य व्यञ्जनको भवतीति ।

**शाब्दिकानाम्मते व्यञ्जनासत्वे प्रमाणम्**

प्रमाणं चात्र "उपसर्गाः क्रियायोगे" इति सूत्रीयं भाष्यम् । तत्र हि क्रियायोग इत्यनेन क्रियया सहोपसर्गस्यायं व्यङ्ग्यव्यञ्जकभावसम्बन्ध एव स्वाभिप्रेतो भगवतः सूत्रकारस्य;, न तु वाच्यवाचकभावः, स तु क्रियया सह धातोरेव । किञ्च, "भूवादयः" इति सूत्रीयं भाष्यमत्रास्ति प्रमाणभूतम् । तथाहि– **क्रियाविशेषक उपसर्गः, पचतीति क्रिया गम्यते, तां प्रत्युपसर्गो विशिनष्टि** इत्युक्तं भाष्यकृता पतञ्जलिना । (पतञ्जलिः, १९९९पृ.१६३ –१६४) उद्द्योतकारेण चैवं व्याख्यातम् –**क्रियाविशेषक उपसर्ग इति यथाऽन्वयव्यतिरेकाभ्यां प्रत्ययोऽर्थबोधकः, तथा ताभ्यामेव क्रियागतविशेषद्योतक उपसर्गः, क्रियावाची धातुरेवेति भाव** । अत्र क्रियाविशेषक उपसर्गः, क्रियागतविशेषद्योतक इत्यर्थः । एवञ्च क्रियाविशेषस्य द्योत्यता, उपसर्गस्य द्योतकता स्पष्टं लभ्यते । क्रियोपसर्गयोः द्योत्यद्योतकभावसम्बन्धः सुतरामनुभूयते ।

किञ्च , "भूवादयो धातवः" इति सूत्रस्य 'क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः –इत्यर्थे क्रियावाचिन इत्यंशो व्यञ्जनावृत्तिमहिम्नैव लब्धः । अन्यथा वादयो भ्वादयो धातुसंज्ञा इति प्रथमकक्षा, ततश्चादिशब्दस्य प्रकारवाचितया वाप्रकारा भ्वादयो धातुसंज्ञा इति द्वितीयकक्षा, ततः प्रकारशब्दस्य सदृशार्थकत्वेन वासदृशा भ्वादयो धातुसंज्ञा इति तृतीया कक्षा, ततञ्च प्रतियोगितावच्छेदकव्यापकीभूतधर्मेण सादृश्यं गृह्यत इति नियमबलेन क्रियावाचिनो भ्वादय इत्यादि लभ्यते, प्रतियोगितावच्छेदकत्वव्यापकीभूतेन क्रियावाचित्वेन सादृश्यस्य ग्रहणात् ।

इदं च क्रियावचित्वं न शक्त्या लब्धुं शक्यम्, वादिपदस्य तत्र शक्तेरभावात् । नाऽपि लक्षणया प्राप्तव्यः, लक्षणायाः शाब्दिकमतेऽभावात् । नाऽपि शक्यतावच्छेदकस्यारोपः कर्तुं शक्यः, मुख्यार्थस्य बाधितस्थल एव तदौचित्यात् । प्रकृते वा सदृशरूपो वादिशब्दस्य मुख्योऽर्थस्तस्य भ्वाद्यर्थेऽन्वयबाधो नास्तीति कृत्वा व्यञ्जनावृतिरेव शरणम् ईदृशार्थबोधने । अयमर्थो न प्रमाविषयतामधिरोहति इति तु न वाच्यम्, भगवता भाष्यकृतैवास्यार्थस्य महता संरम्भेण बोधितत्वात् । अपि चात्रैव सूत्रे शब्दतः स्फुटं व्यञ्जनायाः समर्थनं क्रियते भाष्यकारेण । तथा हि– नान्तरेण क्रियां भूतभविष्यद्वर्तमानकाला व्यज्यन्ते । अस्त्यादिविभिरपि भूतभविष्यद्वर्तमानकाला व्यज्यन्त इति । अत्र व्यज्यन्त इत्यस्य व्यञ्जनया बोध्यन्ते इत्यर्थः सुस्पष्टः प्रतीयते ।

एवमेव **आरोपितत्वं नञ्द्योत्यम् द्योतकाः प्रादयो येन** इत्यादिकया भट्टोजिदीक्षितोक्तया, वैयाकरणसिद्धान्तलघुमञ्जूषायामेतत्समर्थने श्रीनागोजिभट्टोक्त्या, किञ्च **व्यर्थं सद् यद्यत्सूत्रं पदं वा ज्ञापकमुच्यते तत्सर्व व्यञ्जकमेव शब्दप्रामाण्यर्यालोचनायाम्** इति भैरवमिश्रोक्त्या चैषा व्यञ्जनाख्या वृत्तिः प्रतिपदं समाद्रियते शाब्दिकैः ।

लघुमञ्जूषायाः कलाटीकायां श्रीबालभट्टा एतत्समर्थने बह्वीर्युक्तीरुपस्थापयामासुः । तथाहि– **यत्तु गतोऽस्तमर्कः** इत्यादौ न व्यञ्जना प्रतिष्ठां लब्धुं योग्या, एकसम्बन्धि ज्ञानादपरसम्बन्धिस्मरणवत् स्मृतिरेव तं तमर्थं विषयीकरिष्यति– इति, तन्न रमणीयतामैहति, उक्तवाक्यश्रवणोत्तरं सन्ध्यावन्दनं कर्तव्यमिति मया स्मृतम् इत्यनुव्यवसायो न भवति, तत्ताया उल्लेखोऽपि न भवति, स्मृतौ तु तत्तोल्लेख आवश्यकः । इदं पदं वाक्यं वा एतदर्थस्य न वाचकम्, न लक्षकम्, नाऽपि स्मारकम्, अपि तु व्यञ्जनया बोधकमिति प्रामाणिकव्यवहारेण शक्त्यादिव्यतिरिक्ताया व्यञ्जनाया अभ्युपगमाच्च । मुख्यार्थासम्बद्धस्याप्यनया बोधदर्शनाच्च इति ।

**नानार्थकशब्दस्थले व्यञ्जनावृत्तिविचारः**

तान्त्रिकैः द्विविधः शब्दव्यापारः अङ्गीकृतः शक्तिर्लक्षणा चेति । वृत्तिरिति अनयोः संहत्य नाम । परन्तु आलङ्कारिकैः आभ्याम् अतिरिक्तिः व्यञ्जनाव्यापारः अङ्गीकृतः । सः किमर्थमङ्गीकार्यः ? इत्यत्रालङ्कारिका विवदन्ते नानार्थकशब्दस्थले प्राचीनालङ्कारिकाः मम्मटप्रभृतयः एवं वदन्ति–

**अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।**

**संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥** (मम्मटः, १९८१, पृ.११)

यन्त्रणमपरार्थोपस्थानप्रतिबन्धः इति । यथा दूरस्थो भूधरो रम्यः इति वाक्ये भूधरशब्दः अनेकार्थकः, प्रकारणवशात् तेन शब्देन राजा उपस्थापितः । अप्राकरणिकः पर्वतः नैव उपस्थाप्यते । तदुपस्थितौ प्रकरणं प्रतिबन्धकम् । अथापि वाक्यमिदं शृण्वतः अप्राकरणिकस्य दूरस्थो पर्वतो रम्यः इत्यर्थस्य बोधो भवति, स च बोधः न शक्त्या । शक्तेः प्रकरणेन प्रतिबद्धत्वात् । तस्मात् व्यञ्जनावृत्त्या एव अयं बोधः उपपादनीयः इति ।

मतमिदं जगन्नाथपण्डित एवं निराकरोति – **नानार्थकस्थलेऽपि अप्राकरणिकस्य अर्थस्य स्मृतिर्भवत्येव** ।(जगन्नाथः, १९५७ पृ.सं.२०–२८) अर्थद्वये गृहीतसङ्गतेः पुरुषस्य शब्दश्रवणे सति संस्कारस्य किञ्चित् प्रतिबन्धकं कल्प्यम् । कापि तादृशप्रतिबन्धकस्य अदृष्टत्वात् । अतस्तत्र अप्राकरणिकोऽपि अर्थः स्मर्यते, तद्विषयकः शाब्दबोधश्च जायत एव ।

अनुभवसिद्धोऽयं विचारः । यतः पयो रमणीयम् इति वाक्यं श्रुत्वा प्रकरणज्ञः प्रकरणानभिज्ञं प्रति बोधयति । नानेन जलस्य रमणीयत्वमुच्यते किन्तु क्षीरस्यैव । तस्मात् नात्र साधनार्थ कारणान्तरमेव गवेषणीयम् । इत्थं प्राचीनमतं निरस्य स्वीयमतमाह जगन्नाथः ।(तत्रैव, १९५७, पृ.२४– २८)

योगरूढिस्थले रूढिज्ञानं केवलयोगार्थस्मृतौ प्रतिबन्धकमित्यङ्गीकृतं सर्वैः दार्शनिकैः । तद्यथा– पङ्कजशब्दात् कमलस्यैव उपस्थितिः भवति न तु भेकस्य इति ।

अथापि अलङ्कारशास्त्रे तादृशः बोधः जायते यथा –

**अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम् ।**

**तिष्ठन्ति चपला यत्र सः कालः समुपस्थितः ॥** (जगन्नाथः, १९५७,पृ.३२– ३३)

अत्र अबलाशब्दः वारिवाहशब्दः च योगरूढः । तत्र च रूढ्या स्त्रीणां, वर्षाकालस्य च बोधो भवति । परन्तु ताभ्यां शब्दाभ्यां केवलयोगेन दुर्बलानां जलवाहकानां च बोधः जायते । चपलाः पुंश्चल्यः, दुर्बलानां श्रियम् अपहृत्य जलवाहकैः पुरुषैः सह रमन्ते इत्यर्थबोधो भवति । स चायं बोधः न योगेन, रूढेः प्रतिबन्धकस्य सत्वात् । अतोऽयं बोधः व्यञ्जना एव उपपादनीयः इति व्यञ्जनावृत्तिरङ्गीकार्या ।

एवं दूरस्थो भूधरो रम्यः इत्यत्रापि अप्राकरणिकस्य अर्थस्य स्मृतिः भवत्येव । तथापि प्राकरणिकाप्राकरणिकयोरर्थयोरुपमानोपमेयभावो व्यञ्जनैकसमधिगम्यः । तस्मात् व्यञ्जना अङ्गीकार्या ॥

**नागेशभट्टस्य मतम्**

सिद्धान्तलघुमञ्जूषायामेतत्स्वरूपस्य निरुपणावसरे संस्कारविशेषे व्यञ्जना इत्यूचिरे श्रीनागोजिभट्टाः संस्कारे विशेषस्त्रिधा उक्तस्तैः । तथा च **– यथा लक्षणाया मुख्यार्थबाधग्रहपूर्वकमेव बोधो भवति, तथात्र न भवति, मुख्यार्थस्य बाधग्रहो भवतु, अनया तु बोधो जायत एवेति मुख्यार्थबाधग्रहनिरपेक्षबोधजनकत्वं संस्कारे प्रथमो विशेषः । लक्षणया तु मुख्यार्थसम्बद्धस्यैवाप्रसिद्धस्यैव वा बोधो भवति** । (पूर्वत् भट्टः, (सन् १९९०), अनया तु स नियमो न समादृत इति मुख्यार्थसम्बद्धासम्बद्धसाधारणप्रसिद्धार्थविषयकत्वमुक्तसंस्कारे द्वितीयो विशेषः। उक्तसंस्कारस्योद्बुद्धानुद्

बुद्धत्वसाधारण्ये सर्वत्रैव सर्वेषामनया बोधः कथं न भवति, इत्यतिप्रसक्तिवारणाय वक्त्रादिवैशिष्ट्यज्ञानस्यैतज्जन्यबोधे सहकारिताऽभ्युपेयत इति वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धत्वमपि तत्र तृतीयो विशेष इति ।

अत्रोच्यते –एषा संस्कारविशेषरूपा व्यञ्जना न्यायदर्शने समवायसम्बन्धेनात्मनि तिष्ठेत्, वेदान्तदर्शने तादात्म्यसम्बन्धेनान्तःकरणे निवत्स्यतीति शब्दतदर्थयोरुभयोरप्यविद्य मानतया तयोरस्याः कथं सम्बन्धता स्यात् ? सम्बन्धस्योभयवृत्तित्वनियमात् । अस्यां परिस्थितौ न्यायशास्त्राभ्युपगताया इच्छायाः शक्तित्वाङ्गीकारे तस्याः पदपदार्थयोः सम्बन्धत्वाभावरूपं दूषणं पूर्वं भवद्भिरुद्भावितं तार्किकाणां शिरस्सु, स एव दोषेऽधुनोक्तसंस्कारस्य वृत्तित्वसमर्थकानां भवतां मान्यवराणाम् ।

**व्यञ्जनायाः समन्वयप्रकारः**

व्यङ्ग्यव्यञ्जकभावसम्बन्धरूपैव व्यञ्जना मन्तव्या, संस्कारविशेषस्य तु तज्ज्ञापकतया तस्मिन् ज्ञापके हेतौ व्यञ्जनापदस्य व्यवहारो लक्षणयाऽप्रसिद्धशक्त्या वा । अनुभूयते च क्वचित् कार्ये क्वचिच्च कारणे एकस्यैव शब्दस्य प्रयोगः । यथा शक्यसम्बन्धरूपे कारणे लक्षणापदस्य व्यवहारो भवति न्यायशास्त्रे, शक्यताऽवच्छेदकारोपात्मके तत्फले लक्षणाशब्दस्य प्रयोगो भवति व्याकरणशास्त्रे । उच्यते च स्वयमपि **द्योतकत्वं च क्वचित् स्वसमभिव्याहृतपदीयशक्तिव्यञ्जकत्वम्** इति । (नागेशभट्टः, १९९०,पृ.१०३) एतेनोक्तस्य व्यङ्ग्यव्यञ्जकभावसम्बन्धस्य व्यञ्जनापदेन ग्रहणं शब्दस्थले स्पष्टं सूचितमस्ति। अपि च यथा दीपे प्रकाशकत्वशक्तावपि घटादिभिः संयोगसम्बन्धे सत्येव तस्याश्चरितार्थता वक्तुं शक्या, नान्यथा, तथैव शब्दे व्यङ्ग्यव्यञ्जकभावसाध्येऽप्यर्थेन सह तद्भिन्नस्य तादृशसंस्कारविशेषविषयत्वस्य सत्तयैव तच्चरितार्थता । व्यञ्जना तु स्वरूपपसती हेतुरिति भावः ।

नन्वर्थबोधात् प्राक् कथमस्य व्यङ्ग्यव्यञ्जकभावसम्बन्धस्य ज्ञानम् ? एतज्ज्ञानमन्तरा च कथमर्थविशेषविषयकः शाब्दबोध इति चेत्, अत्रोच्यते–, वाच्यवाचकभावसम्बन्धवदस्याप्यनादितया दोषाभावात्।एतच्च पदविषयकव्यञ्जनाविषये, वाक्यगता व्यञ्जना तु स्वरूपसती एव शाब्दबोधजनिका वाक्यनिष्ठशक्तिसम्बन्धवत् । अत एवोक्तं कलाकृद्भिः – "व्यञ्जना स्वरूपसती हेतुः" इति । पूर्ववत् भट्टः, (सन् १९९०), वाक्यनिष्ठा शक्तिरपि ज्ञातैव बोधहेतुः परमार्थदृष्ट्या वाक्यगता शक्तिरपि ज्ञाता सत्येव शाब्दबोधं जनयतीत्येव सिद्धान्तः । अत्रेयमाशङ्का जागर्ति यद् वाक्यार्थस्य वाक्यशक्त्यैव ज्ञातत्वे तस्यापूर्वत्वं भज्येतेति चेत्, अत्रेत्थं पर्यालोच्यते – पदार्थांशे पदस्य शक्तेः सत्त्वेन पारिशेष्यादन्वयांश एव वाक्यशक्तिः पर्यवस्यति । तत्रान्वयसामान्ये सा शक्तिः, अन्वयविशेषस्तु समभिव्याहाररूपाकाङ्क्षाज्ञानेनैव लभ्य इत्यन्विताभिधानवादिमतवदेतस्योपपत्तिः ।

यदि तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं शक्तिग्रहः, पश्चात्तत्तत्पद आवापेनोद्वावेन च तद्ग्रह इति शाब्दिकानां राद्धान्तेनोक्तव्यवस्था न सम्भवतीति उच्यते, तदा श्रीनागोजिभट्टसिद्धान्तमनुसृत्य मध्ये स्मृतिरूपाया वाक्यार्थोपस्थितेरसम्भवेन व्यापारतयानपेक्षणेन चेष्टं साधनीयम्, स्फुटीकृतञ्चायमाशयो दर्पणकृताऽपि ।

वाक्यार्थज्ञाने पदार्थज्ञानं व्यापार इति भाष्यमतं तु प्रक्रियाकल्पे पदार्थोपस्थितिविधया जायमाने वाक्यार्थबोध एवेति न तत्पक्षाद् विरोधः।वाक्यनिष्ठशक्तिज्ञानेन वाक्यार्थस्य स्मरणमेव कुतो न स्वीक्रियते? एकसम्बन्धिज्ञानमपरसम्बन्धिनः स्मारकमिति नियमादिति तु न शङ्कनीयम्, एकसम्बन्धिज्ञानं ह्युद्बुद्धसंस्कारमात्रेणापरसम्बन्धिनं स्मारयति, अत एव धूमज्ञानेन व्याप्तिज्ञानसहकृतेनाग्नेरनुमितिरेव भवति, न त्वेकसम्बन्धिज्ञानधियाऽपरसम्बनिधनोऽग्नेः स्मृतिः ।

एवमेवात्र वाक्यशक्तिपक्षेऽपि 'सैन्धवमानय' इतयादिनानार्थकस्थल एकतरार्थविषयकबोधोत्पत्तये तात्पर्यज्ञानस्यापि सहकारितया स्वीकारेणोक्तशङ्का नोपस्थातुमर्हति । शब्दानां स्वरूपेऽर्थेऽपि शक्तिरिति शाब्दिकसिद्धान्तेन

'घटोऽस्ति' इत्यादिस्थलेऽप्यर्थद्वयविषयकबोधसम्भावनायां सर्वत्रैव तात्पर्यग्रहस्य हेतुतयाऽपेक्षितत्वेन संस्कारमात्रस्य हेतुत्वाभावान्नास्ति वाक्यार्थस्य स्मृतित्वाशङ्का । एवं च **वाक्यनिष्ठशक्तेर्ज्ञानस्य हेतुत्वे सिद्धान्तिते वाक्यनिष्ठव्यञ्जनाया अपि ज्ञानमेव वाक्यार्थबोधे हेतुत्वेन स्वीकरणीयम् ।**

**व्यञ्जनायाः स्वरूपसत्या हेतद्त्वप्रतिपादनम्:**

व्यङ्ग्यार्थस्यानैयत्येन शब्देन सहानादिसम्बन्धासम्भवेन संस्कारविशेषस्यैव व्यञ्जनात्वपक्षेण च पदे वाक्ये च सर्वत्र स्वरूपसती एव व्यञ्जना हेतुः । एतावता शाब्दबोधात् प्राक् कथं व्यङ्ग्यव्यञ्जकभावरूपसम्बन्धस्य ज्ञानमिति शङ्काया उत्थानमेव न भवति । अत एवोक्तमनुपदमेव व्यञ्जनायाः स्वरूपसत्या हेतुत्वं कलाकृद्भिः – शक्तिरेतज्जन्मगृहीतेव बोधहेतुः, व्यञ्जना तु जन्मान्तरगृहीताऽपि इत्यपि शक्तेरस्या भेदकत्वम् । इदमेवाभिप्रेत्य व्यञ्जना स्वरूप सती हेतुरिति प्रवादः । अतिरिक्ताया व्यञ्जनायाः पदार्थान्तरत्वस्य स्वरूपसत्याऽप्येतत्प्रत्येतुं शक्यते यद् व्यञ्जनावादिमते स्वरूपसत्या एव तस्याः शाब्दहेतुत्वस्याभ्युपगम इति । वस्तुतो व्यङ्ग्यव्यञ्जकभावसम्बन्धस्य व्यञ्जनात्वते तस्य ज्ञानं शाब्दबोधे हेतुतयाऽभ्युपेयते ।

**लक्षणेत्थं भूताख्यानभागवीप्सासु प्रतिपर्यनव** इति पाणिनिसूत्रे उदाहृतस्य 'वृक्षं प्रति विद्योतते विद्युत्' इत्यस्य वृक्षसम्बन्धिविद्योतनमित्यर्थः प्रादर्शि मनोरमाकृता । तत्र वृक्षविद्योतने शक्यार्थौ लक्ष्यलक्षणभावसम्बन्धश्च प्रतेर्द्योत्योऽर्थः, तस्य वृत्तिजन्योपस्थितेरभावे कथमन्वयबोधः स्यादिति तत्र व्यञ्जनाया ज्ञानमावश्यकम् ।

एवमेव 'सर्पिषोऽपि स्यात्' इत्यत्र बिन्दुरूपेऽर्थेऽपिशब्दस्य व्यञ्जनावृत्तिः, तस्या ज्ञानेनैव बिन्दुरूपार्थस्योपस्थितिः, तद्विषयकः शाब्दबोधश्च । अपिशब्दस्य कर्मप्रवचनीयभेदे प्रक्रियापक्ष इदमेवोचितम् । ध्वनितं चैतत्– "अपि पदार्थ" इति सूत्रव्याख्यावसरे सिद्धान्तकौमुद्याम् लघुशब्देन्दुशेखरे च । कुत्र???

किञ्च, शाब्दबोधे वृत्तिविशिष्टज्ञानस्य हेतुत्वं वदद्भिर्मञ्जूषाकारैरस्या ज्ञानस्य हेतुता स्पष्टं प्रतिबोधिता । अन्यथा लक्षणायाः शक्तिरूपत्वे व्यञ्जनाश्च स्वरूपसत्या एव हेतुत्वे तत्र वृत्तिपदं निष्प्रयोजनं स्यादतः शक्तिविशिष्टज्ञानमेव हेतुतया वचनीयं स्यात् । अतश्च प्रकृतिप्रत्ययपदान्यतमशब्दस्थलेऽज्ञाताया वृत्तेरनुपयोगे ज्ञाताया एव व्यञ्जनाया हेतुता । अन्यत्र त्वस्तु नाम स्वरूपसत्याः कारणता इति विचारयन्तु सुधियः ।

किञ्चानुमानेनार्थापत्या लक्षणाज्ञानेन वा एषा गतार्था इत्यभ्युपेयते न्यायदर्शनविद्भिः । ततोऽप्यायाति यदस्या ज्ञानमेव शाब्दं प्रतिकारणमिति । न हि ज्ञानस्य प्रतिविधानं ज्ञानाद् विजातीयेन कर्तुं शक्यते ।

रसरूपस्यात्मनोऽभिव्यक्त्यर्थमङ्गीकृताऽऽलङ्कारिकैः स्वप्राणभूतेव व्यञ्जनाख्या शब्दवृत्तिः । एतस्या लक्षणमनेकत्र स्थलेषूल्लिखितं तदनुगामिभिः । यथा च काव्यप्रकाशटीकाकारेण श्रीवामनाचार्येण **व्यञ्जना च**

**शक्तिलक्षणाद्यजन्यप्रतीतिजनकः पदादिगतो व्यापार** इत्युक्तम् । (मम्मटः, सन् १९८१, पृ.सं.३८– ३९), श्रीहरिदासभट्टाचार्येणाऽपि **वाच्यादिभिन्नार्थप्रतिपादकत्वे स वृत्तित्वं व्यञ्जनात्वमिति लक्षणमुक्तम्** । वस्तुतः शब्दमात्रेण भिन्नमर्थतः पूर्वचर्चितमेवैतल्लक्षणम् । मूलग्रन्थत एवेदं लक्षणं लभ्यते । तच्च पूर्वमेवोक्तत्वाद् **विरतास्वभिधाद्यासु** ........ इत्यादौ स्वकार्यसम्पादनेन शब्दस्य ज्ञानस्य क्रियायाश्च व्यापारः सकृदेव क्षीणसामर्थ्यो भवतीति कार्यान्तरार्थं पुनरन्यो व्यापारोऽपेक्ष्यत इति नियमेनाभिधादीनां निवृत्तौ सत्यां व्यञ्जनाख्यो व्यापार आश्रीयते । व्यञ्जन– ध्वनन– गमन– प्रत्यायनादिशब्दैरप्ययं व्यापारः सङ्कीर्तितो भवति । अस्या लक्षणम् लक्षणास्थले च **फलप्रयायिका नियतशक्त्यनेकार्थस्थले विवक्षितातिरिक्तवाच्यप्रत्यायिका वृत्तिर्व्यञ्जनेति** स्थलभेदेन लक्षणद्वयमुक्तं तत्तदाचार्यैः । 'वक्त्रादिवैलक्षण्यहेतुका या प्रतिभा तच्छालीनामन्यार्थधीस्तद्धेतुव्यापारत्वं व्यञ्जनात्वमिति भावः ।

## निष्कर्षः

पराथर्ाऽभिधानायाः पदपदार्थसम्बन्धरूपायाश्चः वृत्तेः स्वरूपं शाब्दिकैः कृत्तद्धितादीनां पञ्चानां व्याकरणगतानां पारिभाषिकाणां संकेतितेऽपि शब्दशक्तिरूपा वृत्तिस्त्रिधा अभिधा–लक्षणा –व्यञ्जना च स्वीकृता तासु तृतीयवृत्तिविषये निपातानां द्योतकत्वं स्फोटस्य व्यङ्गयता च वैयाकरणनां मुख्याधारविषयत्वादकामेनापि स्वीकारेण द्योतकत्वस्य व्यञ्जकत्वरूपत्वं प्रकृतध्वनिव्यङ्ग्यत्वे सति निराकाङ्क्षार्थबोधजनकत्वं स्फोटत्वमिति शब्दब्रह्मणः स्वरूपलक्षणं संसाधितम् । एवमेव आलङ्कारिकाः शक्तिस्त्रिधा अभिधालक्षणाव्यञ्जनेति वदन्ति । एतेषां नये व्यञ्जनां विना व्यङ्ग्यकाव्यत्वादीनां सर्वजनानां हितकरत्वं रुचिकरत्वञ्च ब्रह्मसहोदररसस्वरूपेण न सम्भवति तच्चानया व्यञ्जनयैव अभिहिता नाऽन्यया । एवमेव आलङ्कारिकाणां आलङ्करिकत्वं लाक्षणिकत्वञ्च न सम्भवेत् । यथा–“गङ्गायां घोषः” इति लक्षणास्थले शैत्यपावनत्वादिप्रतीतिरपि व्यञ्जनाव्यापारैरभिव्यज्यते = प्रतीयते । काव्यकलारसरसिकालङ्कारिकैः प्रयुक्ता तृतीया मूलभूता शास्त्रसोपस्करावलेहवद्व्यापाररूपा व्यञ्जना नितरां विचारणीया । अभिधादितात्पर्यपर्यन्तासु वृत्तिविरतासु सतीषु वस्त्वलङ्काररसलक्षणार्थो व्यङ्ग्यत्वेन प्रत्याय्यते यया वृत्त्या सा शक्तिभेदात्मिका विलक्षणा वृत्तिर्व्यञ्जना वर्तते । वैयाकरणनिकाये स्फोटायनत्वादीनामभिव्यङ्ग्यत्वकारणीभूतेयं प्रतिभोद्भूतार्थविषयकः संस्कारविशेषो कथ्यते । मुख्यार्थनिरपेक्षबोधजनकस्तत्संबद्धाऽसंबद्धः साधारणः प्रसिद्धाप्रसिद्धार्थविषयकं वक्त्रादिवैशिष्ट्यज्ञानप्रतिभादिभिः सम्यक्तयोद्बुद्धश्च विलक्षणसंस्कारविशेषार्थे च बोध्यः । एतस्या वृत्तेरनुमोदनं तार्किका अपि द्वितीयाया वृत्तेः पदवृत्तित्वं अस्याश्च पदैकदेशवृत्तित्वेन मुख्यार्थबाधनिरपेक्षबोधजनकत्वेन च तदन्तर्भावयितुं नार्हन्ति । अपि च निपातानां स्वशक्त्यार्थाभावाल्लक्षणाया असम्भवाद् व्यञ्जकतारूपैव द्योतकत्वमवधेयमिति भावः ।

## सन्दर्भसामग्रीसूची

अमरसिंहः, (ई.१९९५) अमरकोषः, रामाश्रमी टीका, पुनर्मुद्रितं संस्करणम्., दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान ।

आनन्दवर्धनः, (ई २०११), ध्वन्यालोकः, पुनर्मंद्रितं संस्करणम्, वाराणसी : चौखम्बा विद्याभवन ।

जगन्नाथः, (सन्. १९५७), रसगङ्गाधरः, पुनर्मंद्रितं संस्करणम्, वाराणसी : चौखम्बा विद्याभवन चौक ।

दण्डी, (सन् २००१), काव्यादर्शः, पुनर्मंद्रितं संस्करणम्, वाराणसी : चौखम्बा विद्याभवन ।

नागेशभट्टः, (सन् १९९०), वैयाकरणसिद्धान्तलघुमञ्जूषा, वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

नागेशभट्टः, (सन् १९९७), परमलघुमञ्जूषा; वाराणसी : चौखम्बा संस्कृत भवन ।

पतञ्जलिः, (सन् १९९९), व्याकरणमहाभास्यम् दिल्ली, प्रतिभा प्रकाशन,प्राच्य विद्या प्रकाशक एवं पुस्तक विक्रेता शक्ति नगर ।

पाणिनिः, (सन् १९८९), अष्टाध्यायी, वाराणसी : चौखम्बा संस्कृत भवन ।

भट्टः, आशाधरः, (सन् १९५८), कोविदानन्दः; वाराणसी : माष्टर खेलाडीलाल ।

भट्टोजीदीक्षितः, (सन् १९९८), प्रौढमनोरमा, वाराणसी : चौखम्वा संस्कृत सीरीज ।

भर्तृहरिः, (सन्२०१६), वाक्यपदीयम्, वाराणसीःसम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

भामहः, (२०४२) काव्यालङ्कारः, द्वितीयसंस्करणम्, विहार : राष्ट्रभाषा परिषद् ।

मम्मटः (सन्. १९८१), काव्यप्रकाशः, रेवाप्रसादेन सम्पादितः, वाराणसी : काशीहिन्दुविश्वविद्यालयः ।

रुद्रटः, (सन्.१९९८), काव्यालङ्कारः, वाराणसी : चौखम्बा विद्याभवन ।

विश्वनाथः, (सन्.१९७४), साहित्यदर्पणः, समीक्षात्मक भूमिका हिन्दी अनुवाद व्याख्यात्मक टिप्पणी सहित, मेरठ : साहित्य भण्डार शिक्षा साहित्य प्रकाशक सुभाष बजार ।